International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(5): 121-126
© 2025 IJMH
www.themultijournal.com
Received: 07-10-2025
Accepted: 25-10-2025
Publish : 28-10-2025

**डा. के. राजगोपालन्**
आचार्यः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः - 517507

**Correspondence:**
**डा. के. राजगोपालन्**
आचार्यः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः - 517507

# "रसे दोषाः स्युरीदृशाः"

**डा. के. राजगोपालन्**

**"तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि"** इति मम्मटाचार्यकाव्यलक्षणे अदोषौ इति दलम्। अत्र अदोषौ दोषरहितौ शब्दार्थौ काव्यं स्यात् इति। तत्र दोषः नाम कीदृशः? तस्य दोषस्य आचार्यमम्मटोक्तं लक्षणं किम्, तस्य च भेदाः के? इति जिज्ञासायां सोदाहरणं अत्र विचार्यते॥

अग्निपुराणे सप्तचत्वारिंशदुत्तरत्रिशततमे (347) अध्याये **"उद्वेगजनको दोषः सभ्यानाम्"** इत्येवं दोषलक्षणमुक्तम्। एवं च पुराणानुसारं काव्यरसास्वादनसमये दोषः सामाजिकचेतसि क्षोभं समुत्पादयति इति भावः।

वामनेन **"काव्यशोभायाः कर्तारो धर्माः गुणाः"**[1] इति स्वीकृत्य, **"गुणविपर्ययात्मनो दोषाः"**[2] इति कथनात् गुणविपरीतस्वभावानां दोषाणां काव्यशोभायाः विघातकत्वेन रसापकर्षो जायते इति प्रकटितम्॥

दण्ड्याचार्यः स्वकाव्यादर्शे चतुर्थपरिच्छेदारम्भे दोषसामान्यस्वरूपमवोचत् -

**काव्ये दोषा गुणाश्चैव विज्ञातव्या विचक्षणैः।**
**दोषा विपत्तये तत्र गुणाः सम्पत्तये यथा॥**[3] इति।

अनेन काव्यं येन दुष्यति स दोष इति दण्ड्याचार्यमतं ज्ञायते॥

अथालङ्कारमूर्धन्यः मम्मटाचार्यः स्वकीयकाव्यप्रकाशे सप्तमोल्लासे काव्यदोष-सामान्यलक्षणमित्थं ब्रवीति। तद्यथा -

**मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद्वाच्यः।**
**उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेष्वपि सः॥**[4] इति।

काव्ये दोषे सति, गुणादेरप्यकिञ्चित्करत्वात्। यतो हि स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम् इति। यथा- सुन्दरं शरीरं सत्यपि कुष्ठरोगेण दुष्टं चेत् तद्वपुः निरुपयोगाय भवति, तद्वत् काव्यं गुणालङ्कारादिभिः सुन्दरमपि दुष्टं चेत् व्यर्थमेव॥ गुणादिकं विनापि दोषाभावे सति कश्चिदाह्लादसम्भवः, अपदोषतैव विगुणस्य गुणः इति न्यायात्॥ अत एव काव्यलक्षणे अदोषौ इति विशेषणदलस्य गुणालङ्कारात् इति विशेषणदलात् प्रागेव निवेशितम्।

मुख्यः चासौ अर्थः च - मुख्यार्थः। मुख्यस्य अर्थस्य हतिः अपकर्षः यस्मात् स दोषः। मुख्यार्थो हन्यते अपकृष्यते अनेन इति दोषः॥

मम्मटः काव्यप्रकाशे आदौ नित्यानित्यत्वेन द्विधा विभक्तोऽयं दोषः शब्द-अर्थ-रसगतत्वेन त्रिधा परिगणितः। पुनः शब्ददोषः त्रिधा - पदगतदोषः, पदांशगतदोषः वाक्यगतदोष चेति। एवमाहत्य नवति(90)काव्यदोषान् अवोचत्। पुनरेतांश्च पञ्चवर्गेषु समाविष्टवान्। तद्यथा - 1. पदगतदोषाः, 2. पदांशगतदोषाः, 3. वाक्यगतदोषाः, 4. अर्थगतदोषाः, 5. रसगतदोषाः चेति॥ रसगतदोषास्तु प्रमुखतया रसस्य अपकर्षका भवन्ति। पदगतादिचत्वारः दोषास्तु रसस्य गौणत्वेन अप्रत्यक्षरूपेण अपकर्षका भवन्ति इति विवेकः। अतः प्रमुखाः काव्यदोषास्तु रसगतदोषा एव भवन्ति। दोषः नाम मुख्यार्थापकर्षकत्वम्। मुख्यर्थः च रस एव। अत एव विश्वनाथोऽपि **"रसापकर्षकाः दोषाः"**[5] इति जगाद। अर्थात् ये रसस्य अपकर्षं जनयन्ति ते एव दोषाः इति तस्याभिप्रायः। रसशब्देन रस्यते आस्वाद्यते

इति व्युत्पत्त्या भावादिः सङ्गृह्यते। साक्षात् ये मुख्यार्थं रसम् अपकर्षयन्ति ते एव रसदोषाः इति फलितम्॥ अतस्तान् काव्यगतरसदोषान् विवेचयामः॥

एतावता उक्ता दोषास्सर्वे पदपदांशवाक्यार्थानां माध्यमेन रसं प्रति भङ्गं जनयन्ति। इदानीं तु साक्षात् रसस्य विरोधीनः रसदोषान् निरूपयति मम्मटाचार्यः -

**व्यभिचारिरसस्थायिभावानां शब्दवाच्यता।**
**कष्टकल्पनया व्यक्तिरनुभावविभावयोः॥**
**प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः।**
**अकाण्डे प्रथनच्छेदावङ्गस्याप्यतिविस्तृतिः॥**
**अङ्गिनोऽननुसन्धानं प्रकृतीनां विपर्ययः।**
**अनङ्गस्याभिधानं च रसे दोषाः स्युरीदृशाः॥**(6)

व्यभिचारिभावानां निर्वेदादीनाम्, रसानां शृङ्गारादीनाम्,स्थायिभावानां रत्यादीनां च सामान्यतो विशेषतो वा स्वशब्देनोपादानं दोषः भवति। निर्वेदादिशब्देन वा शृङ्गारादिशब्देन वा रत्यादिशब्देन वा उपादाने एते त्रयः रसगतदोषाः भवन्ति। व्यभिचारिणां स्वशब्दानुपादाने सत्येव स्वैः स्वैः अनुभावैः अभिव्यक्तौ भावध्वनित्वं रसाय पर्याप्तत्वं च भवति। शृङ्गारादिपदेन रसस्य उपादानेऽपि विभावादिभिरभिव्यक्तिं विना न चर्वणीयता स्यात्। स्थायिनः अभिव्यक्ता एव रसतां प्राप्नुवन्ति न स्वपदोपात्ताः। एवं व्यञ्जनावृत्तिमाहात्म्यात् रसस्य प्रतीतिः। तत्तत्पदोपादाने तु आस्वादापकर्षः एव दोषत्वेन पर्यवस्यति। रस्यते आस्वद्यते इति व्युत्पत्त्या आस्वाद्यमानः अनुभावादिसंवलितः सामाजिकनिष्ठः अवाच्यः च स्थायिभाव एव रसः उच्यते। **"लोके यथा गोप्यानां स्तनादीनां साक्षात्प्रकाशने नोपादेयता तथानुभावादिबहुव्यङ्ग्यत्वेन चमत्कारनिदानानां व्यभिचारिभावानां स्वशब्दप्रकाशनेन"** इति चवर्तिभट्टाचार्याः।(7)

एवञ्च रसापकर्षकाः रसदोषाः त्रयोदश सन्ति। तत्र क्रमशः –

| | | | |
|---|---|---|---|
| 1. | व्यभिचारिभावानां शब्दवाच्यता | 8. | अकाण्डे प्रथनम् |
| 2 | रसभावानां शब्दवाच्यता | 9 | अकाण्डे छेदः |
| 3 | स्थायिभावानां शब्दवाच्यता | 10 | अङ्गस्य अतिविस्तृतिः |
| 4 | अनुभावस्य कष्टकल्पनया व्यक्तिः | 11 | अङ्गिनः अननुसन्धानम् (अपरामर्शः) |
| 5 | विभावस्य कष्टकल्पनया व्यक्तिः | 12 | प्रकृतीनां विपर्ययः |
| 6 | प्रतिकूल(विरुद्ध)विभादिग्रहः | 13 | अनङ्गस्याभिधानम् |
| 7 | अङ्गभूतरसस्य पुनः पुनः दीप्तिः | | |

- चेत्येतादृशाः दोषाः रसे भवेयुः इति॥

एतेषां त्रयोदशरसगतदोषाणां क्रमशः सोदाहरणं विवेच्यते।

### 1. व्यभिचारिभावानां शब्दवाच्यता -

यत्र काव्ये व्यभिचारिभावेषु त्रयस्त्रिंशत्सु यस्य कस्यापि शब्देन नाम्ना वा निर्देशः क्रियते तत्र तत्तद्व्यभिचारिशब्दवाच्यतादोषः सम्भवति। यथा–

**सव्रीडा दयितानने, सकरुणा मातङ्गचर्माम्बरे,**
**सत्रासा भुजगे, सविस्मयरसा चन्द्रेऽमृतस्यन्दिनि।**
**सेर्ष्या जह्नुसुतावलोकनविधौ, दीना कपोलोदरे,**
**पार्वत्या नवसङ्गमप्रणयिनी दृष्टिः शिवायास्तु वः॥**(8)

**अयं च भावः -** नायिकया पार्वत्या नायकस्य परमशिवस्य प्रत्यक्षतया आननदर्शनात् व्रीडा, गजचर्माम्बरदर्शनात् कारुण्यम्, सम्पदभावेन शोकोदयात् भुजगदर्शनेन त्रासः भयम्, आकाशे स्थीयमानः चन्द्रः कथमत्र शेखरे इति चन्द्रदर्शनात् विस्मयः, पत्युः अन्यस्त्रीसङ्गदर्शनात् ईर्ष्या, कण्ठे मणिहारदर्शनापेक्षया कपाल-दर्शनात् दैन्यम् इत्येतादृश(व्यभिचारिभाव)लक्षणोपेतायाः पार्वत्याः प्रथमसङ्गमसमये प्रीतियुक्ता दृष्टिः युष्माकं मङ्गलाय भवतु - इति॥

अत्र उदाहरणश्लोके सर्वत्र प्रत्येकस्मिन् वाक्ये च व्रीडादीनां (व्रीडा, करुणा, त्रासः, ईर्ष्या, दीना) व्यभिचारिभावानां शब्दशः वाच्यत्वं दृश्यमानत्वात् अत्र व्यभिचारिभावानां शब्दवाच्यता इत्यभिधः रसगतदोषः सम्भवति। एतद्दोषपरिहाराय -

**व्यानम्रा दयितानने, मुकुलिता मातङ्गचर्माम्बरे,**
**सोत्कम्पा भुजगे, निमेषरहिता चन्द्रेऽमृतस्यन्दिनि।**
**मीलद्भ्रूः सुरसिन्धुदर्शनविधौ, म्लाना कपोलोदरे,**
**पार्वत्या नवसङ्गमप्रणयिनी दृष्टिः शिवायास्तु वः॥**

इत्येवंरूपेण काव्यरचना यदि स्यात् तर्हि न व्यभिचारिभावानां शब्दवाच्यत्वरूपदोषः सिद्ध्यति। अपि तु व्यानम्रेत्यादिभिः अनुभावैः अभिव्यक्तत्वात् अत्र भावध्वनिरेव भवति॥

### 2. रसभावानां शब्दवाच्यता -

यत्र काव्ये रसेषु शृङ्गारादिषु नवसङ्ख्याकेषु यस्य कस्यापि रसशब्देन शृङ्गारादिनाम्ना वा निर्देशः क्रियते तत्र रसशब्दवाच्यतादोषः सम्भवति। रसस्य सामान्यतो रसशब्देन वाच्यत्वे दोषः यथा -

**तामनङ्गजयमङ्गलश्रियं किञ्चिदुच्चभुजमूललोकिताम्।**
**नेत्रयोः कृतवतोऽस्य गोचरे कोऽप्यजायत रसो निरन्तरः॥**(9) इति।

**अयं च भावः -** कामसम्बन्धिविजयमङ्गललक्ष्मीरूपाम्, किञ्चिदुन्नते कुचसन्धौ लोकिताम्, तां नायिकां नेत्रयोः विषये कृतवतः अस्य नायकस्य अविच्छिन्नः कोऽपि अनिर्वचनीयः रसः शृङ्गारः अजायत। अत्र रसपदोपात्ततद्रसाक्षिप्तस्वविभावानुभावव्यभिचारिभिर्व्यज्यते रसः, किन्तु रसपद-वाच्यत्वात् आस्वादापकर्षः दोषः - इति वामनाचार्यबालबोधिन्याम्। अत्र कोऽप्यजायत रसो निरन्तरः इत्यपेक्षया कोऽप्यजायत विकार आन्तरः इति पाठे तु न दोषः॥

रसस्य विशेषतः शृङ्गारपदेन वाच्यत्वे दोषम् उदाहरति -

**आलोक्य मलकपोलतलाभिषिक्तव्यक्तानुरागसुभगामभिराममूर्तिम्।**
**पश्यैष बाल्यमतिवृत्त्यविवर्तमानः शृङ्गारसीमनि तरङ्गितमातनोति॥**(10) इति।

**अयं भावः -** किशोरावस्थायां मृदुतरयोः गण्डफलकयोः अभिषिक्तः रोमाञ्चादिना अभिव्यक्तः यः अनुरागः दर्शनीयरूपां रमणीयतरावयवसंस्थानां बालाम् आलोक्य एषः बाल्यम् अतिक्रम्य विवर्तमानः

पुलककटाक्षादिभिर्चेष्टमानः सन् शृङ्गारसीमनि वेल्लितम् अविच्छिन्नखेलनं वा करोति त्वं पश्य इति॥

अत्र रसस्य विशेषतः शृङ्गारपदवाच्यत्वं दोषः। अत्र शृङ्गार-पदोपात्तसम्भोगशृङ्गार-रसाक्षिप्तस्वविभावानुभावव्यभिचारिभि-र्व्यज्यते रसः, किन्तु शृङ्गारपदवाच्यत्वात् आस्वादापकर्ष इति॥

**3. स्थायिभावानां शब्दवाच्यता -**

यत्र काव्ये स्थायिभावेषु रत्यादिषु नवसङ्ख्याकेषु यस्य कस्यापि रतिशब्देन निर्देशः क्रियते तत्र स्थायिभावशब्दवाच्यतादोषः सम्भवति। स्थायिभावस्य विशेषतः उत्साहपदेन वाच्यत्वे दोषम् उदाहरति -

**सम्प्रहारे प्रहरणैः प्रहाराणां परस्परम्।**
**ठणत्कारैः श्रुतिगतैरुत्साहस्तस्य कोऽप्यभूत्॥**(11) इति।

युद्धे शस्त्रैः परस्परं क्रियमाणानां प्रहाराणां कर्णप्राप्तैः ठणत्कारशब्दैः प्रकृतवीरस्य कोऽपि अनिर्वचनीयः उत्साहः वीररसस्थायी अभूत् इति भावः॥

अत्र उत्साहस्य स्थायिभावस्य उत्साहशब्देन वाच्यत्वात् स्थायि-भाववाच्यता इति रसदोषः जातः। प्रमोदस्तस्य कोऽप्यभूत् इति पाठे तु न दोषः। स्थायिभावोऽस्य कोऽप्यभूत् इति पाठे सामान्यतः शब्दवाच्यतादोषः भवत्येव॥

**4. अनुभावस्य कष्टकल्पनया व्यक्तिः -**

कष्टकल्पनया व्यक्तिः नाम अनुभावविभावयोः कष्टकल्पनया पृथक् श्लोकाद्यनुसन्धेय-प्रकरणादिपर्यालोचनया विलम्बेन अभिव्यक्तिः। इदानीम् अनुभावस्य कष्टकल्पनया व्यक्तिः। यथा -

**कर्पूरधूलिधवलद्युतिपूरधौतदिङ्मण्डले शिशिररोचिषि तस्य यूनः।**
**लीलाशिरोंऽशुकनिवेशविशेषक्लृप्तिव्यक्तस्तनोन्नतिरभून्नयनावनौ सा॥**(12) इति।

शिशिररोचिषि चन्द्रे कर्पूरधूलिवत् धवयः यः कान्तसमुदायः तेन प्रक्षालितं दिङ्मण्डलं येन तथाभूते सति लीलया शिरः सम्बन्धिवस्त्रनिवेशस्य या विशेषरचना तया व्यक्ता स्तनोन्नतिः यस्या सा नायिका तस्य कश्चित् प्रसिद्धस्य यूनः दृष्टिपथम् आगता इत्यर्थः।

अत्र उदाहरणे संयोगशृङ्गारे उचितः चन्द्रचन्द्रिकारूपः विभावः अस्ति, नवयुवतीरूपः आलम्बनविभावोऽपि अस्ति। किन्तु नायके सञ्जायमानाः स्तम्भः स्वेदः इत्याद्यनुभावाः अनायासेन नोत्पद्यन्ते। अतः अनुभावस्य कष्टकल्पनया अभिव्यक्तिः रसदोषः भवति। अत्र स्तम्भादिरूपः कश्चन पुन्निष्ठस्य शृङ्गाररसस्य अनुभावः अभिमतः। स चानुभावः प्रकरणाद्यनुसन्धानसापेक्षतया विलम्बेन प्रतीयते इति कष्टेन गम्यः। उद्दीपनरूपो विभावः चन्द्रः, लीलाशिरोंऽशुक इति च। आलम्बनरूपो विभावः नायिका। अनुभावं पर्यवसाययन्ति प्रकरणाद्यनुसन्धानसापेक्षतया विलम्बेन अवगमयन्ति ये तादृशाः। तादृशचन्द्रादीनाम् अवलोकनेऽपि तस्य यूनः अरसिकत्वे रतेरनुदयस्यापि सम्भवेन प्रथमं तस्य रसिकत्वमनुसन्धेयम्। ततो रत्यनुभावप्रतीतिः इति विलम्बः। अथवा चन्द्रोदये यूनोः परस्परावलोकने विकारो भवत्येव इति प्रतिसन्धानोत्तरं रत्यनुभावप्रतीतिः अस्माद् विलम्ब इति।

वस्तुतः अत्र **"अभून्नयनावनौ सा"** इत्यनेन तस्या एव आलम्बनत्वप्रतिपादनात् पुन्निष्ठ एव शृङ्गारोऽत्र प्रतिपिपाद-यिषितः। न च पुंसि कश्चित् अनुभाव उपात्तः, न च विभावैः आक्षेपार्ह इति कष्टेन कल्पनीयः इति। एवमत्र उद्दीपनालम्बनरूपाः (उद्दीपनविभावरूपः चन्द्रः, आलम्बनविभावः नायिका च) शृङ्गारयोग्याः विभावाः अनुभावाप्रतीत्या आस्वादनापर्यवसायिनः स्थिताः इति कष्टकल्पना इति॥

**5. विभावस्य कष्टकल्पनया व्यक्तिः -**

**परिहरति रतिं, मतिं लुनीते, स्खलति भृशं, परिवर्तते च भूयः।**
**इति बत विषमा दशास्य देहं परिभवति प्रसभं, किमत्र कुर्मः॥**(13) इति।

बत कठिनविरहावस्था अस्य नायकस्य देहं हठात् बलात्कारेण तिरस्करोति, अस्मिन् विषये वयं किं कुर्मः? न कश्चिदुपायः स्फुरति - इत्यर्थः॥ अत्र रतिं वस्तुनि स्पृहां दूरीकरोति, मतिं छनत्ति, तथा च अत्यन्तं स्खलयति, भूयः परिवर्तयति। केचित्तु - परिहरति - त्यजति, स्खलति - विपर्येति, परिवर्तते - विशेषदर्शी च भवति। अत्र नायकस्यैव कर्तृत्वं, न तु दशायाः अनन्वयात्। इत्येवं विषमा दशा। भ्रमविशेषदर्शनाभ्यां सुखदुःखदायित्वात् क्षणक्षणविलक्षणावस्था अस्य नायकस्य देहं प्रसभं परिभवति इत्यर्थः॥

अत्र रतिपरिहारादीनाम् अनुभावानां करुणादावपि सम्भवात् कामिनीरूपः विभावः यत्नतः प्रतिपाद्यः अतो विभावस्य कष्टकल्पना॥ अत्र कामिनीरूपः नायकनिष्ठस्य विप्रलम्भशृङ्गारस्य आलम्बनविभावः अभिमतः। स च विभावः नोपात्तः। न च रतिपरिहारादिभिः अनुभावैः आक्षेप्तुमपि शक्यते। तेषां करुणभयानकबीभत्सेष्वपि सम्भवेन झटिति अनापेक्षात्, किन्तु प्रकरणाद्यनुसन्धानेन विलम्बेनेति कष्टेन कल्पनीय इति दोषः। बहूनां सङ्गमेन एकतरविश्रान्त्यभावात् आस्वादविघ्नः॥

**6. प्रतिकूलविभादिग्रहः -**

प्रतिकूलविभादिग्रहः नाम प्रतिकूलः प्रकृतरसादेः विरुद्धः यः रसादिः तद्विभावानुभाव-व्यभिचारिणां ग्रहः अर्थात् ग्रहणम् उपदानम् इति।

6.1. तादृशयोः विभावानुभावव्यभिचारिणोः ग्रहम् उदाहरति -

**प्रसादे वर्तस्व, प्रकटय मुदं, सन्त्यज रुषं,**
**प्रिये शुष्यत्यङ्गान्यमृतमिव ते सिञ्चतु वचः।**
**निधानं सौख्यानां क्षणमभिमुखं स्थापय मुखं,**
**न मुग्धे प्रत्येतुं प्रभवति गतः कालहरिणः॥**(14)

चन्द्रककवेः पद्यमिति शाङ्र्गधरपद्धतेः ज्ञायते। प्रणयकलहकुपितां नायिकां मालतीं प्रति नायकस्य माधवस्य उक्तिरियम् - इति उद्द्योतचन्द्रिकाव्याख्यानतोऽवगम्यते॥ हे प्रिये प्रसन्ना भव, हर्षं प्रकटय, कोपं सन्त्यज, अमृतमिव तव वचः शुष्कीभवन्ति मम

अवयवान् सिञ्चतु। सौख्यानाम् उत्पत्तिस्थानभूतं मुखं क्षणकालं मम सम्मुखं स्थापय, हे मुग्धे (विवेकरहिते) गतः कालरूपः हरिणः परावर्तयितुं न शक्नोति। अत्र काले हरिणत्वारोपेण चपलत्वं ध्वन्यते॥

अत्र शृङ्गाररसे प्रतिकूलस्य शान्तरसस्य प्रकाश्यमानः कालानित्यतारूपो उद्दीपनविभावः तत्प्रकाशितो निर्वेदरूपः शान्तस्थाय्याख्यः व्यभिचारीभावः च स्फुटमेव उपात्तः, अतः प्रतिकूलविभादिग्रहः इति दोषः सञ्जातः॥

**6.2. प्रतिकूलानुभावग्रहः -**

**णिहुअरमणिम्म लोअणपहम्मि पडिए गुरुअणमज्झम्मि।**
**सअलपरिहारहिअआ वणगमणं एव्व महइ वहू॥**(15)
**निभृतरमणे लोचनपथे पतिते गुरुजनमध्ये।**
**सकलपरिहारहृदया वनगमनमेवेच्छति वधूः॥**(16)

इति संस्कृतच्छाया॥

**अस्यायं भावः -** हे गुप्तकामके (जारे) गुरुजनानां मध्ये नेत्रमार्गे पतिते सति सकलस्य गृहकार्यस्य त्यागे हृदयं यस्यास्तथाभूता वधूः तेन सह रन्तुं वनगमनमेव इच्छति - इति। गुरुजनमध्ये इत्यनेन वध्वाः अत्यन्ततरलत्वं धन्यते॥

अत्र व्याजादिकं विना वनगमनं सकलकार्यपरिहारश्च शान्तानुभवः, न च व्याजः प्रतिपादित इति शृङ्गारस्य प्रकृतस्य विच्छेद इति प्रतिकूलानुभवग्रहो दोषः। इन्धनम् - काष्ठम्, आदिशब्देन कुसुमादीनां ग्रहणम्। व्याजः - कपटः। इन्धनाद्यानयनव्याजेन सम्भोगार्थं वनगमनं यद्युच्यते तदा न शान्तानुभवग्रह इति न दोष इति॥ तेन प्रतिकूलानुभवग्रहेण प्रकृतविप्रलम्भशृङ्गाररसविच्छेदः इति भावः। अत्र गुरुजनसन्निधौ निभृतरमणदर्शने प्रकाशशङ्कया वैराग्यस्यापि सम्भवान्न निभृतेत्यादिपदादेव शृङ्गारप्रतीतिरिति बोध्यम्॥

**7. अङ्गभूतरसस्य पुनः पुनः दीप्तिः -**

**"दीप्तिः पुनः पुनर्यथा - कुमारसम्भवे रतिविलापे।"**(17) इति काव्य-प्रकाशकारः।

दीपितस्य (स्वसामग्रीलब्धपरिपोषस्य) अन्तरा विच्छिद्य विच्छिद्य ग्रहणम्, वेद्यान्तरसम्बन्धेन धाराया विच्छेदात्। पुनः पुनः दीप्तिस्तु अङ्गरसानामेव, न त्वङ्गिनः, अङ्गिनस्तु सा महाभारतादौ शान्तादेरिव न वैरस्यमावहतीति प्रतीपादौ स्पष्टम्। पुनः पुनः दीप्तिः प्रबन्धे एव सम्भवति। तद्यथा - कुमारसम्भवस्य करुणरसप्रति-पादात्मके चतुर्थे सर्गे रतिविलापप्रस्तावे -

**अथ मोहपरायणा सती विवशा कामवधूर्विबोधिता।**
**विधिना प्रतिपादयिष्यता नववैधव्यमसह्यवेदनम्॥**(18)

इत्यादिना अङ्गभूतं करुणरसं दीपयति। अस्यायं भावः - अनन्तरं मोहैकशरणा सती निश्चेष्टा रतिः असह्यवेदनं नववैधव्यम् अनुभावयिष्यता दैवेन विबोधिता अभूत्। इत्यर्थः॥

अथ च वसन्तदर्शनेन विच्छिन्नः, पुनः च -

**तमवेक्ष्य रुरोद सा भृशं स्तनसम्बाधमुरो जघान च।**
**स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते॥**(19)

इत्यादिना अङ्गभूतं करुणरसम् उद्दीपयति।

अत्र एकैस्यैव अङ्गस्य करुणरसस्य पुनः पुनः आस्वादः सहृदयानां वैरस्याय इति दूषकताबीजम्। एतदेवोक्तं प्रदीपोद्द्योतयोः "उपभुक्तो हि पुनरुपभुज्यमानः उपभुक्तकुसुमपरिमल इव सहृदयाना-मास्वादापकर्षकः" इति। तथा च ध्वनिकारः आनन्दवर्धनः तृतीयो-द्द्योते -"परिपाकं गतस्यापि पौनः पुन्येन दीपनम्। परस्य स्याद्विरोधाय" इत्यवोचत्। अत्र परस्य - श्रोतुः, विरोधाय - वैरस्याय इत्यर्थः॥

**8. अकाण्डे प्रथनम् -**

**"अथ अकाण्डे प्रथनं यथा - वेणीसंहारे द्वितीयेऽङ्केऽनके वीरक्षये प्रवृत्ते भानुमत्या सह दुर्योधनस्य शृङ्गारवर्णनम्॥"**(20) इति काव्य-प्रकाशकारवचनम्॥

अत्र अकाण्डे - अनवसरे, प्रथनम् - विस्तारवर्णनम् इत्यर्थः। भीष्मादिवीरमरणे प्रक्रान्ते, तदानीं करुणवीरादिरेव आस्वाद्यते, न तु शृङ्गारः इति दोष इति भावः॥ तदुक्तं चोद्द्योते - "तदा करुणस्य वीरस्य वाऽवसरो न शृङ्गारादेः न हि शोकोत्साहवासनानिरुद्धे प्रतिपत्तृचेतसि शृङ्गारादिः पदमपि लभते, सुतरामास्वाद इति भावः" इति।

**9. अकाण्डे छेदः -**

**"अकाण्डे छेदो यथा - वीरचरिते द्वीतीयेऽङ्के राघवभार्ग-वयोर्धाराधिरूढे वीररसे "कङ्कण-मोचनाय गच्छामि" इति राघव-स्योक्तौ॥"**(21) इति काव्यप्रकाशकारपङ्क्तिः॥

अत्र अकाण्डे - अनवसरे, छेदः - रसस्य विच्छेदः इत्यर्थः। यथा – भवभूतिविरचिते महावीरचरिताख्ये नाटके श्रीराम-परशुरामयोः धारावाहिनि अविच्छिन्नप्रसरतया प्रवृत्ते वीररसे युद्धोत्साहे राघवः कङ्कणमोचनाय - विवाहदशमदिनोत्सवाय गच्छामीति कथनम् - अकाण्डे छेदः इति नामकः रसदोषः भवति। व्याजेन निर्गमनं प्रतिपादयन्ती श्रीरामस्य अवीरत्वे पर्यवस्यतीति नायके श्रीरामे वीररसो नास्वाद्येत इति दोषः॥

**10. अङ्गस्य अतिविस्तृतिः -**

अङ्गस्य अप्रधानस्य अतिविस्तारेण वर्णने अङ्गातिविस्तृतिः इत्याख्यरसदोषो भवति। यथा - हयग्रीववधे हयग्रीवस्य॥

काश्मीरपण्डितेन मेण्ठकविना प्रणीते हयग्रीववधाख्ये नाटके विष्णुः प्रधानो नायकः। नायकस्य महाविष्णोः वर्णनं परित्यज्य अप्रधानस्य प्रतिनायकस्य हयग्रीवनामकस्य दैत्यस्य जलकेलि-वनविहार-रतोत्सवादीनां वर्णनम् अतिविस्तृतया करणात् हयग्रीवस्यैव नायकत्वं प्रत्याययति। तथा च तद्गत एव रसः प्राधान्येन आस्वाद्यते इति दोषः। काव्यप्रयोजनेषु अन्यतमस्य रामादिवद्वर्तितव्यं न रावणादिवत् इत्युपदेशस्य हानिरपि भवति॥ अतः काव्ये अङ्गस्य अतिविस्तृतवर्णनं न करणीयम्, क्रियते चेत् दोषाय एव॥ यद्यपि काव्यदर्शे –

**वंशवीर्यश्रुतादीनि वर्णयित्वा रिपोरपि।**
**तज्जयान्नायकोत्कर्षवर्णनं च धिनोति नः॥**(22)

इत्युक्तरीत्या काव्ये नायकोत्कर्षप्रदर्शनार्थं रिपोः प्रतिनायकस्य कुलपरम्परा, शास्त्रज्ञानम् इत्यादिगुणान् वर्णयित्वा, एतादृशलक्षणोपेतस्य शत्रोः प्रतिनायकस्य नाशात् प्रधानस्य नायकस्य उत्कर्षगुणवर्णनं करणीयम्, तत्तु अस्मान् आनन्दयति इति द्वितीयक्रमः उक्तः॥ तथाप्यत्र हयग्रीववधनाटके प्रतिनायकस्य हयग्रीवस्य गुणवर्णनम् अतिशयेन विहितिमिति दोषाय एव॥

**11. अङ्गिनः अननुसन्धानम् (अपरामर्शः) -**

अङ्गिनः - प्रधानस्य प्रबन्धव्यापिनः, अननुसन्धानम् - अपरामर्शः, विस्मरणम्। प्रधानस्य नायकस्य नायिकाया वा अननुसन्धानम् अपि रसदोष एव॥

श्रीहर्षविरचितरत्नावलीनाटिकायां चतुर्थाङ्के(23) - सिंहलेश्वरस्य बाभ्रव्यः इति नामकस्य कञ्चुकिनः आगमनकाले विजयवर्मवृत्तान्तश्रवणासक्तहृदयेन राज्ञा नायकेन वत्सराजेन सागरिकायाः रत्नावल्याख्यायाः मुख्यनायिकायाः नाममात्रस्यापि अग्रहणात् विस्मृतिः। एतेन नाटिकाप्रतिपाद्य-शृङ्गाररसो विच्छिन्नप्रायः इति दोषः॥

**12. प्रकृतीनां विपर्ययः -**

प्रकृतौ यद्वर्णनम् अनुचितं तत्र तद्वर्णनं प्रकृतिविपर्ययः। प्रकृतयः नायकाः दिव्याः अदिव्याः दिव्यादिव्याः च। तल्लक्षणन्तु -

**नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः।**
**रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा॥१॥**
**बुद्ध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः।**
**शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः॥२॥** (24) इति॥

| | | |
|---|---|---|
| 1 | दिव्याः | दिवि स्वर्गे भवाः देवतैकरूपा इन्द्रादयः। |
| 2 | अदिव्याः | मनुष्यैकरूपाः वत्सराजादयः। |
| 3 | दिव्यादिव्याः | मानुषरूपेणाप्यवतीर्णा देवाः श्रीरामादयः। |

त्रिविधा अप्येते नायकाः धीरोदात्तादिभेदेन चतुर्धा भवन्ति। वीररौद्रशृङ्गार-शान्तरसप्रधानाः धीरोदात्त-धीरोद्धत-धीरललित-धीरप्रशान्ताः उत्तम-अधम-मध्यमाश्च भवन्ति॥

| | | |
|---|---|---|
| 1 | धीरोदात्तः | वीररसप्रधानो धीरोदात्तः। यथा - श्रीरामः॥ **महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः। स्थिरो निगूढाहङ्कारो धीरोदात्तदृढव्रतः॥** |
| 2 | धीरोद्धतः | रौद्ररसप्रधानो धीरोद्धतः। यथा - भार्गवः॥ **दर्पमात्सर्यभूयिष्ठो मायाछद्मपरायणः। धीरोद्धतस्त्वहङ्कारी चलश्चण्डो विकत्थनः॥**(25) |
| 3 | धीरललितः | शृङ्गाररसप्रधानो धीरललितः। यथा - श्रीकृष्णः॥ **निश्चिन्तो धीरललितः कलासक्तः सुखी मृदुः।** |
| 4 | धीरप्रशान्तः | शान्तरसप्रधानो धीरप्रशान्तः। यथा - जीमूतवाहनः॥ **सामान्यगुणयुक्तस्तु धीरशान्तो द्विजादिकः॥** |

एवं नायकाः दिव्य-अदिव्य-दिव्यादिव्यभेदेन त्रिविधा अपि धीरोदात्त-धीरोद्धत-धीरललित-धीरप्रशान्तभेदेन प्रत्येकं चतुर्विधा भूत्वा द्वादशप्रकारकाः भवन्ति। एते द्वादशभेदा अपि उत्तमादिभेदेन प्रत्येकं त्रिधा। अर्थात् 1. गुणोत्कर्षः, 2. गुणापकर्षः, 3. गुणोत्कर्षापकर्षः (उभयः) इति त्रयो भेदाः भवन्ति। एवं च -

1.दिव्याः, 2. अदिव्याः, 3. दिव्यादिव्याः X 1. धीरोदात्तः, 2. धीरोद्धतः, 3. धीरललितः, 4. धीरप्रशान्तः (3 X 4) = 12 द्वादशप्रकारकाः।

12 द्वादशप्रकारकाः X 3 (1. उत्तमः (गुणोत्कर्षः), 2. अधमः (गुणापकर्षः), मध्यमः (गुणोत्कर्षापकर्षः) = 36 प्रकारकाः प्रकृतिनायकाः भवन्ति॥ एवञ्च साहित्यदर्पणादिरीत्या अनुकूलः, दक्षिणः, धृष्टः, शठः चेति चत्वारः अपि प्रकृतिभेदेन गणनीयाः भवन्ति॥

**दिव्य-अदिव्य-दिव्यादिव्यनायकस्वरूपकथनम् -**

**1. दिव्यः -**

रतिहासशोकाद्भुतरसाः अदिव्योत्तमप्रकृतिवत् दिव्येष्वपि बोध्यम्। किन्तु सम्भोगशृङ्गाररूपा रतिः उत्तमदेवताविषया न वर्णनीया। सम्भोगः चुम्बनालिङ्गनादिरूपः नान्यैरवलोकनीयो भवति। यदि वर्ण्यते पित्रोः सम्भोगवर्णनमिव अत्यन्तमनुचितम्। तद्यथा –

**दृष्टमुक्तमधरोष्ठमम्बिका वेदनाविधुतपाणिपल्लवा।**
**शीतलेन निरवाप तत्क्षणं मौलिचन्द्रशकलेन शूलिनः॥**(26)

इत्येवंरूपेण वर्णनम् अनुचितम्॥

एवं भयं नोत्तमेषु, जुगुप्साप्यदिव्येष्वेवेति बोध्यम्। क्रोधोत्साहविशेषावपि दिव्येष्वेव वर्णनीयौ। तद्यथा कुमारसम्भवे तृतीये सर्गे -

**क्रोधं प्रभो! संहर संहरेति यावद्गिरः खे मरुतां चरन्ति।**
**तावत् स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार॥**(27)

अस्यायमर्थः - हे प्रभो! शङ्कर! क्रोधं संहर संहर। वाचः आकाशे यावत् चरन्ति तावत् एव शिवस्य नेत्रजन्मा वह्निः मन्मथं भस्मावशेषं चकार (ददाह) इति।

एवमत्र वर्णितः क्रोधवत्, भ्रुकुट्यादिविकारवर्जितः क्रोधः सद्यः फलदः स्वर्गपाताल-गगनसमुद्रोल्लङ्घनाद्युत्साहश्च दिव्येष्वेव वर्णनीयाः इति॥

**2. अदिव्यः –**

अदिव्येषु तु यावदवदानं प्रसिद्धमुचितं वा तावदेवोपनिबद्धव्यम्। अधिकं तु निबध्यमानम् असत्यप्रतिभासनं नायकवद्वर्तितव्यं न प्रतिनायकवद् इत्युपदेशेन पर्यवस्येत्।

अवदानं भूतपूर्वचरित्रं लोकप्रसिद्धं वर्णनीयम्। मनुष्येषु अधिकवर्णने असत्यत्वेन रामादिवद्वर्तितव्यं न रावणादिवत् इत्युपदेशे पर्यवसानं न स्यात्, अतः दोषः स्यात्॥

**3. दिव्यादिव्यः –**

दिव्यादिव्येषु किं वर्णनीयम् इत्युक्ते उभयथापि इति समाधानम्॥ एवम् दिव्य-अदिव्य-दिव्यादिव्येषु उक्तस्य औचित्यस्य अन्यथावर्णनम् इव धीरोदात्त-धीरोद्धत-धीरललित-धीरशान्तानामपि औचित्यस्य अन्यथावर्णनं प्रकृतिविपर्ययः इत्याख्यः रसदोषो भवति।

सम्बोधनौचित्यम् -

तत्रभवन्, भगवन् इति सम्बुद्धिः उत्तमेनैव प्रयोक्तव्यः, न तु अधमेन नायकेन। उत्तमेष्वपि मुनिप्रभृतावेव वाच्यम्, न राजादौ। तथा भट्टारक इति पदं राजादौ उत्तमेन न वाच्यम्,देवादौ एव वाच्यम्। अन्यथा - यदि राजादौ प्रयोगः तर्हि प्रकृतिविपर्यय इति दोषः॥ एवं देशकालवयोजात्यादीनां वेषव्यवहारादिकम् उचितमेव उपनिबद्धव्यम्॥ एवं देशादिष्विपि अनुचितवर्णने विपर्ययप्रसङ्गात् उचितमेव वर्णयनीयम्। यथा स्वर्गस्य अङ्गनासु मानुषीवेषादिवर्णनम्, रसातलादौ मेघादिवर्णनम्, वसन्ततौं च मेघवर्णनम्, जरायां सम्भोगवर्णनम्, कुलवधूजातीयस्य साभिप्रायवचनादिवर्णनम् अनुचितं विपर्ययो भवति, स च रसदोषाय पर्यवस्यति॥

## 13. अनङ्गस्याभिधानम् -

अनङ्गस्य रसानुपकारकस्य वर्णनम्। यथा - कर्पूरमञ्जर्यां नायिकया स्वात्मना च कृतं वसन्तवर्णनमनादृत्य बन्दिवर्णितस्य राज्ञा प्रशंसनम् अनङ्गस्याभिधानम् इत्याख्यः रसदोष भवति।

अनङ्गस्य - रसानुपकारकस्य, अभिधानम् - वर्णनम्। कर्पूरमञ्जरीसट्टके - नायिकया विनम्रलेखया स्वात्मना च स्वेन च राज्ञा चण्डपालेन बन्दिवर्णितस्य वसन्तवर्णनं प्रकृतरसस्य अनुपकारकम्, अतः अनुचितम् इति भाति। ईदृशा इत्यनेन यदनौचित्यहेतवः सर्वे एव दोषा भवन्ति परिगणितप्रकारस्तु प्रदर्शनार्थमुक्तः॥ परिगणितात् अन्यत् उदाहरति -

नायिकापादाघातादिना नायकस्य कोपादिवर्णनम् अनुचितं भवति। एवम् अनौचित्यं रसविच्छेदहेतुः। यतः नित्यादिस्वरूपब्रह्मोपस्थापकवेदभाग इव औचित्योपनिबन्धः रसोपस्थितिनिदानं स्यात्॥ अतः मम्मटाचार्यः विज्ञापयति यत् - काव्यकर्तृभिः एतानि काव्यरसदोषलक्षणानि मनसि निधाय जागरूकतया काव्यरचना करणीया, तदा रसहानिर्न भवेत्, सत्कीर्तिः समुपार्ज्येत इति॥

## उपयुक्तग्रन्थसूची (Reference Books)


| क्र.सं. | ग्रन्थनाम | प्रकाशकः |
|---|---|---|
| 1. | **काव्यप्रकाशः** आचार्यमम्मटाचार्यविरचितः | भट्टवामनाचार्यविरचितः बालबोधिनीटीकासहितः, निर्णयसागरमुद्रणालयः, मुम्बापुरी - 1901 |
| 2. | **काव्यप्रकाशः** आचार्यमम्मटाचार्यविरचितः | हरिशङ्करशर्मसङ्गृहीतनागेश्वरीटीकासहितः, चौखम्बासंस्कृतग्रन्थालयः, बनारस -1, 1951 |
| 3. | **काव्यप्रकाशः** आचार्यमम्मटाचार्यविरचितः | आचार्यपुल्लेलश्रीरामचन्द्रुडुविरचितः बालानन्दिनी इत्याख्यान्ध्रटीकासहितः, संस्कृतभाषाप्रचारसमितिः, हैदराबाद् - 1995 |
| 4. | **काव्यादर्शः** दण्ड्याचार्यविरचितः | तरुणवाचस्पतिकृतकाव्यादर्शव्याख्यासमेतः, ब्रह्मवादिमुद्राक्षरशाला, Madras - 1910 |
| 5. | **पुराणं काव्यरूपतायाः विवेचनम्** | Rampratap Vedalankar, Jammu Universtiy, Jammu Tawi - 1974 |
| 6. | **काव्यालङ्कारसूत्राणि** वामनाचार्यविरचितानि वृत्तिसहितानि | श्रीगोपेन्द्रत्रिपुरहरभूपालविरचित◌ानि काव्यालङ्कारकामधेनूटीकासहितानि च, चौखम्बा संस्कृत संस्थान, वाराणसी - Third Edition - 1987 |
| 7. | **रत्नावलीनाटिका** महाकविश्रीहर्षदेवविरचिता | नारायणकृतप्रभाव्याख्यासहिता, निर्णयसागरमुद्रणालयः, मुम्बापुरी, प्रथमसंस्करणम् - 1913 |
| 8. | **कुमारसम्भवम्** महाकविकालिदासप्रणीतम् | सञ्जीविनी-शिशुहितैषिणीव्याख्याद्वयोपेतम्, चौखम्बा संस्कृत संस्थान, वाराणसी - द्वितीयसंस्करणम् - 1987 |
| 9. | **दशरूपकम्** श्रीधनञ्जयविरचितम् | धनिककृतावलोकव्याख्यया समेतम्, साहित्यभाण्डार, मीरठ - नवीनसंस्करणम् - 1989 |
| 10. | **साहित्यदर्पणः** श्रीमद्विश्वनाथकविराजप्रणीतः | श्रीमद्रामचरणतर्कवागीशकृतया विवृत्यानुगतः, काङ्गडीगुरुकुलमुद्रणालयः, 1921 |


### अधोटिप्पण्यः (Foot notes)

1. काव्यालङ्कारसूत्रवृत्तिः, 3.1.1
2. काव्यालङ्कारसूत्रवृत्तिः, 2.1.1
3. काव्यादर्शः, 4.1 (3.124)
4. काव्यप्रकाशः, 7.1
5. हित्यदर्पणम्, 7.1
6. काव्यप्रकाशः, 7.12 तः 14 पर्यन्तम्
7. काव्यप्रकाशः, 7 उल्लासः, बालबोधिनी, पृ. 526
8. काव्यप्रकाशः, 7, 321 उदा॰ पृ. 526
9. काव्यप्रकाशः, 7, 322 उदा॰ पृ. 528
10. काव्यप्रकाशः, 7, 323 उदा॰ पृ. 528
11. काव्यप्रकाशः, 7, 324 उदा॰ पृ. 529
12. काव्यप्रकाशः, 7, 325 उदा॰ पृ. 529
13. काव्यप्रकाशः, 7, 326 उदा॰ पृ. 531
14. काव्यप्रकाशः, 7, 327 उदा॰ पृ. 532
15. काव्यप्रकाशः, 7, 328 उदा॰ पृ. 532
16. काव्यप्रकाशः, 7, 328 उदा॰ बालबोधिनी, पृ. 532
17. काव्यप्रकाशः, 7 उल्लासः, पृ. 533
18. कुमारसम्भवम्, 4.1
19. कुमारसम्भवम्, 4.26
20. काव्यप्रकाशः, 7 उल्लासः, पृ. 533
21. काव्यप्रकाशः, 7 उल्लासः, पृ. 534
22. काव्यादर्शः, 1.22
23. रत्नावली, चतुर्थाङ्कः, पृ. 164 तः 180 पर्यन्तम्
24. दशरूपकम्, द्वितीयप्रकाशः, 1-2 कारिके
25. दशरूपकम्, द्वितीयप्रकाशः, 4-5 कारिके
26. कुमारसम्भवम्, 8.18
27. कुमारसम्भवम्, 3.72